# Shri Radhakrishna Ashtakam

# શ્રીરાધાકૃષ્ણાષ્ટકમ્

## Document Information

Text title : rAdhAkRRiShNAShTakam 1

File name : rAdhAkRRiShNAShTakam.itx

Category : aShTaka, vishhnu, krishna, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીરાધાકૃષ્ણાષ્ટકમ્

યઃ શ્રીગોવર્ધનાદ્રિં સકલસુરપતિં ત્રસ્તગોગોપવૃન્દં
    સ્વીયં સંરક્ષિતઞ્ચેત્યમરસુખકરં મોહયન્ સન્દધાર ।
તન્માનં ખણ્ડયિત્વા વિજિતરિપુકુલો નીલધારાધરાભઃ
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૧॥

યં દૃષ્ટ્વા કંસભૂપઃ સ્વકૃતકૃતિમહો સંસ્મરન્મન્ત્રિવર્યાન્
    કિં વા પૂર્વં મયેદં કૃતમિતિ વચનં દુઃખિતઃ પ્રત્યુવાચ ।
આજ્ઞપ્તો નારદેન સ્મિતયુતવદનઃ પૂરયન્સર્વકામાન્
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૨॥

યેન પ્રોદ્યત્પ્રતાપા નૃપતિકુલભવાઃ પાણ્ડવાઃ કૌરવાબ્ધિં
    તીર્ત્વા પારં તદીયં જગદખિલનૃણાં દુસ્તરઞ્ચેતિ જગ્મુઃ ।
તત્પત્નીચીરવૃદ્ધિપ્રવિદિતમહિમા ભૂતલે ભૂપતીશઃ
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૩॥

યસ્મૈ ચોદ્ધૃત્ય પાત્રાદ્દધિયુતનવનીતં કરૈર્ગોપિકાભિ-
    ર્દત્તં તદ્ભાવપૂર્તૌ વિનિહિતહૃદયઃ સત્યમેવં તિરોધાત્ ।
મુક્તાગુઞ્જાવલીભિઃ પ્રચુરતમરુચિઃ કુણ્ડલાકાન્તગણ્ડઃ
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૪॥

યસ્માદ્વિશ્વાભિરામાદિહ જનનવિધૌ સર્વનન્દાદિગોપાઃ
    સંસારાર્તે વિમુક્તાઃ સકલસુખકરાઃ સમ્પદઃ પ્રાપુરેવ ।
ઇત્થં પૂર્ણેન્દુવક્ત્રઃ કલકમલદૃશઃ સ્વીયજન્મ સ્તુવન્તઃ
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૫॥

યસ્ય શ્રીનન્દસૂનોર્વ્રજયુવતિજનાશ્ચાગતા ભતૃપુત્રાં-
    સ્ત્યક્ત્વા શ્રુત્વા સમીપે વિચકિતનયનાઃ સપ્રમોદાઃ સ્વગેહે ।
રન્તું રાસાદિલીલા મનસિજદલિતા વેણુનાદઞ્ચ રમ્યં
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૬॥

યસ્મિન્દષ્ટે સમસ્તે જગતિ યુવતયઃ પ્રાણનાથવ્રતાયા-
    સ્તા અપ્યેવં હિ નૂનં કિમપિ ચ હૃદયે કામભાવં દધત્યઃ ।
તત્સ્નેહાબ્ધિં વપુશ્ચેદવિદિતધરણૌ સૂર્યબિમ્બસ્વરૂપાઃ
    કૃષ્ણો રાધાસમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૭॥

યઃ સ્વીયે ગોકુલેઽસ્મિન્વિદિતનિજકુલોદ્ભૂતબાલૈઃ સમેતો
    માતર્યેવં ચકાર પ્રસૃતતમગુણાન્બાલલીલાવિલાસાન્ ।
હત્વા વત્સપ્રલમ્બદ્વિવિદબકખરાન્ગોપવૃન્દં જુગોપ
    કૃષ્ણો રાધા સમેતો વિલસતુ હૃદયે સોઽસ્મદીયે સદૈવ ॥ ૮॥

રાધાકૃષ્ણાષ્ટકં પ્રાતરુત્થાય પ્રપઠેન્નરઃ ।
ય એવં સર્વદા નૂનં સ પ્રાપ્નોતિ પરાં ગતિમ્ ॥ ૯॥

॥ ઇતિ શ્રીરઘુનાથગુમ્ફિતં શ્રીરાધાકૃષ્ણાષ્ટકસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran

---

*Shri Radhakrishna Ashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*